# .. sa NgrAmavijayavidyA ..

# ॥ સઙ્ગ્રામવિજયવિદ્યા ॥

## Document Information

Text title : saNgrAmavijayavidyA

File name : saNgrAmavijayavidyA.itx

Category : kavacha

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Latest update : March 20, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ સઙ્ગ્રામવિજયવિદ્યા ॥

॥ અથ સઙ્ગ્રામવિજયવિદ્યા ॥

ઈશ્વર ઉવાચ ।
સઙ્ગ્રામવિજયાં વિદ્યાં પદમાલાં વદામ્યહમ્ ।
ૐ હ્રીં ચામુણ્ડે શ્મશાનવાસિનિ ખટ્વાઙ્ગકપાલહસ્તે મહા પ્રેતસમારૂઢે
મહાવિમાનસમાકુલે કાલરાત્રિ મહાગણપરિવૃતે મહામુખે બહુભુજે
ઘણ્ટાડમરુકિઙ્કિણિ હસ્તે અટ્ટાટ્ટહાસે કિલિ કિલિ, ૐ હૂં ફટ્,
દંષ્ટ્રાઘોરાન્ધકારિણિ નાદશબ્દબહુલે ગજચર્મપ્રાવૃતશરીરે
માંસદિગ્ધે લેલિહાનોગ્રજિહ્વે મહારાક્ષસિ રૌદ્રદંષ્ટ્રાકરાલે ભીમાટ્ટાટ્ટહાસે
સ્ફુરદ્વિદ્યુત્પ્રભે ચલ ચલ, ૐ ચકોરનેત્રે ચિલિ ચિલિ, ૐ લલજ્જિહ્વે,
ૐ ભ્રીં ભ્રુકુટિમુખિ હૂંકારભયત્રાસનિ કપાલમાલાવેષ્ટિત
જટામુકુટશસિશાઙ્કધારિણ, અટ્ટાટ્ટહાસે કિલિ કિલિ, ૐ હ્
દંષ્ટ્રાઘોરાન્ધકારિણિ સર્વવિઘ્નવિનાશિનિ, ઇદં કર્મ સાધય સાધય,
ૐ શીઘ્રં કુરુ કુરુ, ૐ ફટ્, ઓમઙ્કુશેન શમય પ્રવેશય, ૐ રઙ્ગ
રઙ્ગ કમ્પય કમ્પય, ૐ ચાલય, ૐ રુધિરમાંસમદ્યપ્રિયે હન હન,
ૐ કુટ્ટ, ૐ છિન્દ, ૐ મારય, ઓમનુક્રમય, ૐ વજ્રશરીરં પાતય,
ૐ ત્રૈલોક્યગતં દુષ્ટમદુષ્ટં વા ગૃહીતમગૃહીતં વાઽઽવેશય,
ૐ નૃત્ય, ૐ વન્દ, ૐ કોટરાક્ષ્યૂર્ધ્વકેશ્યુલૂકવદને કરઙ્કિણિ દહ,
ૐ પચ પચ,
ૐ ગૃહ્ણ, ૐ મણ્ડલમધ્યે પ્રવેશય ૐ કિં વિલમ્બસિ
બ્રહ્મસત્યેન, વિષ્ણુસત્યેન, રુદ્રસત્યેન, ઋષિસત્યેન, આવેશય
ઓં કિલિ કિલિ, ૐ ખિલિ ખિલિ વિલિ વિલિ, ૐ વિકૃતરૂપધારિણિ
કૃષ્ણભુજઙ્ગચેષ્ટિતશરીરે સર્વગ્રહાવેશનિ પ્રલમ્બૌષ્ઠિનિ ભ્રૂ
ભઙ્ગલગ્નનાસિકે વિકટમુખિ કપિલજટે બ્રાહ્મિ ભજ્જ, જ્વાલામુખિ સ્વન,
ૐ રક્તાક્ષિ ઘૂર્ણય ભૂમિં પાતય, ૐ શિરો ગૃહ્ણ ચક્ષુર્મીલય હસ્તપાદૌ
ગૃહ્ણ મુદ્રાં સ્ફોટય, ૐ ફટ્ ૐ વિદારય, ૐ ત્રિશૂલેન ચ્છેદય,
ૐ વજ્રેણ હન, ૐ દણ્ડેન તાડય,
ૐ ચક્રેણ છેદય છેદય ૐ શક્ત્યા ભેદય દંષ્ટ્રયા કીલય
ૐ કર્ણિકયા પાટય, ઓમઙ્કુશેન ગૃહ્ણ, ૐ શિરોક્ષિજ્વરમૈકાહિકં
દ્વ્યાહિકં ત્ર્યાહિકં ચાતુર્થિકં ડાકિનીસ્કન્દગ્રહાન્મુઞ્ચ મુઞ્ચ,
ૐ પચ, ઓમુત્સાદય, ૐ ભૂમિં પાતય, ૐ ગૃહ્ણ, ૐ બ્રહ્માણ્યેહિ,
ૐ માહેશ્વર્યેહિ, ૐ કૌમાર્યેહિ, ૐ વૈષ્ણવ્યેહિ, ૐ વારાહ્યેહિ,
ૐ ઓમૈન્દ્ર્યેહિ, ૐ ચામુણ્ડે એહિ, ૐ રેવત્યેહિ, ઓમાકાશરેવત્યેહિ,

ॐ હિમવચ્ચારિણ્યેહિ, ॐ રુરુમર્દિન્યસુરક્ષયઙ્કર્યાકાશગામિનિ પાશેન
બન્ધ બન્ધ, અઙ્કુશેન કટ કટ સમયન્તિષ્ઠ, ॐ મણ્ડલં પ્રવેશય,
ॐ ગૃહ્ણ મુખં બન્ધ,
ॐ ચક્ષુર્બન્ધ હસ્તપાદૌ ચ બન્ધ દુષ્ટગ્રહાન્સર્વાન્બન્ધ, ॐ દિશો
બન્ધ, ॐ વિદિશો બન્ધ, અધસ્તાદ્બન્ધ, ॐ સર્વં બન્ધ,
ॐ ભસ્મના પાનીયેન વા મૃત્તિકયા સર્ષપૈર્વા સર્વાનાવેશય, ॐ પાતય,
ॐ ચામુણ્ડે કિલિ કિલિ, ॐ વિચ્ચે હું ફટ્ સ્વાહા ।
પદમાલા જયાખ્યેયં સર્વકર્મપ્રસાધિકા ।
સર્વદા હોમજપ્યાદ્યૈઃ પાઠાદ્યૈશ્ચ રણે જયઃ ॥ ૩ ॥

અષ્ટાવિંશભુજા ધ્યેયા અસિખેટકષટ્કરૌ ।
ગદાદણ્ડયુતૌ ચાન્યૌ શરચાપધરૌ પરૌ ॥ ૪॥

મુષ્ટિમુદ્ગરયુક્યૌ ચ શઙ્ખખડ્ગયુતૌ પરૌ ।
ધ્વજવજ્રથરો ચાન્ય સચક્રપરશુ પરૌ ॥ ૫॥

ડમરુદર્પણાઢ્યૌ ચ શક્તિકુન્તધરૌ પરૌ ।
હલેન મુસલેનાઽઽઢ્યૌ પાશતોમરસંયુતૌ ॥ ૬॥

ઢક્કાપણવ સંયુક્તાવભયૌ મુષ્ટિકાન્વિતૌ ।
તર્જયન્તી ચ મહિષં ઘાતની હોમતોઽરિજિત્ ।
ત્રિમધ્વાક્તતિલૈર્હોમો ન દેયા યસ્ય કસ્યચિત્ ॥ ૭॥

ઇતિ સઙ્ગ્રામવિજયવિદ્યાવર્ણનં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

.. sa NgrAmavijayavidyA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*